CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सासात्-पद्धति-मानक-ग्रन्थाः

भारतवर्षे प्रायः संस्कृतभाषा अनुवाद-पद्धत्या पाठ्यते। पाँडिचेयामि अरविन्दाश्रमेऽवश्यं साक्षाद्विधिरास्थीयते किन्तु यतो हि तत्र परीक्षाप्रणाली नास्ति-कक्षाक्रमेण निश्चितः पाठ्यक्रमो नास्ति ततः आदर्शभूताऽपि सा पद्धतिः क्वचिदन्यत्र विद्यालये प्रयोक्तुं न शक्यते।

अस्माभिः यानि पुस्तकानि निर्मितानि तानि साक्षात्पद्धतेरुपरि आधारितानि किंतु तानि पूर्वतः प्रचलितेषु विद्यालयेषु अपि पाठयितुं शक्यन्ते। प्रायः संस्कृताध्यापकाः साक्षात्पद्धत्या न परिचिताः। प्रस्तुतपुस्तकानां कृते अभ्यासनिर्माणाय मया ये ये अध्यापका नियुक्ताः तेऽपि पूर्वसंस्कारस्य त्यागे काठिन्यमन्वभवन्।

१- अस्तु, प्रस्तुतक्रमे चतुरश्चिमवर्ष एव बालः पाठनीयः। तत्र प्रथमे वर्षे केवलं शिशुशब्दकोशः पाठनीयः। तत्र प्रायः परितो वर्तमानानां जीव-फल-शाक-वाहन-यन्त्रादीनां चित्राणि सन्ति। शिशवः केवलं चित्रं द्रक्ष्यंति। वस्तु नाम शिक्षक उच्चारयिष्यति। एकरूपतायाः कृते चित्रस्य अधोऽस्माभिः एकं नाम लिखितम्। शिशुः न तु अक्षराणि पठिष्यति, न किंचित् अपि लेखिष्यति। वस्तु दृष्ट्वा तस्य संस्कृतं नाम स उच्चारयेत्, केवलमिदमेव पूर्ण-वर्षस्य पाठ्यक्रमः।

येषां वस्तूनां साक्षात् प्रदर्शनं कक्षायां सम्भवेत् तानि अवश्यं प्रदर्शनीयानि। अस्य नाम किम्? इति पृष्टे अस्य नाम

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इदृग् इति शिशुः वदेत् । स तदोच्चैरितम्- गगो नाम, स्वास्ति, उत्तिष्ठ, आस्व, अञ्ज इह, तव नाम किम्? तव तातस्य नाम किम्? तव अम्बायाः नाम किम्? इत्यादीनि लघु लघु वाक्यानि मौखिक प्रश्नोत्तरस्पेण शिक्षणीयानि ।

अवधेयम्-

क- एक एव पाठः वारं वारं पाठनीयः । पुनरावृत्तिः शिशुपाठनस्य मूलम् ।

ख- अध्यापकात् शिशुः अधिकं वदेत् इति निश्चेयम् ।

ग- बालकाः परस्परं प्रश्नं कुर्युः अस्यनाम किम्? शिक्षक एव सदा प्रश्नं न कुर्यात् ।

घ- परस्परम् अभिवादनं छात्रा अवश्यं शिक्षणीयः ।

2- पंचाब्दिकवर्षेभ्यो बालकेभ्यः लिपि लेखनं शिक्षणीयम् । सरलीकरणाय प्रस्तुत पुस्तकेषु अकारः केवलम् । इति रूपेण दर्शितः । प्रत्येकस्माद् अक्षरात् चत्वारि चित्राणि दत्तानि किन्तु ततोऽधिकानि अपि वस्तुनामानि उदाहृत्य पाठनीयानि ।

लिपिकाठिन्यक्रमेण लेखनं शिक्षणीयं न तु वर्णमालाक्रमेण । वर्णमालाक्रमस्तु मौखिकरूपेण पाठनीयः । प्रायः आगम न भ त त्र (र) ल प य, श, श स ख घ घ व ब क फ च च्च (छ) ज झ ट ठ ड ढ द इ ी (ई) उ ू (ऊ) े ै (ए ऐ) ो ौ (ओ औ) ङ ञ ण ह ं ः ँ ृ ॄ ऽ इत्ययं क्रमः सहजः । अध्यापकः क्रममिमं परिवर्तयितुं शक्नोति ।

अत्र द्वयोर्योगः

क- ऋ-कारस्य उच्चारणम् रि, रु वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

न कार्यम्। संवृतमकारमुच्चारयितुं यथा मुखं व्यादीयते तथा मुखं सम्प्रसार्य र् यदि उच्चार्यते तदेव शुद्धम् ऋकारोच्चारणम्।

स- अस्यां कक्षायाम्- किं प्रवेशानि क्रीणन्?

लघु शंकायै गन्तुमिच्छामि। आम्, नहि, एषोऽस्मि, तिष्ठ अहमपि आगच्छामि। अहं श्वः न आगमिष्यामि एतादृशानि वाक्यानि दिनानां नामानि इति प्रभृति मौखिकरूपेणैव शिक्षणीयम्

ग- कतिचित् शिशुगीतानि कंठस्थीकारणीयानि।

ख- अहं नमामि, अहम् उत्तिष्ठामि, अहं चलामि आवां नमावः आवाम् उत्तिष्ठावः आवां चलावः इति प्रभृति सक्रियम् अभ्यसनीयम्। एको द्वौ अनेकेचं बालकाः वा दातः पृथक् क्रमेण तिष्ठन्तु। शिक्षकः कथयतु नम, नमतं नमत इत्यादि तदा क्रमेण ते तत्तत् कुर्वन्तु उच्चैः वदन्तु- अहं नमामि इत्यादि।

२- प्रथमवर्षेभ्यो बालकेभ्यः शब्दलेखनं शिक्षणीयम्। तत्र कदापि शीघ्रता न करणीया। येषां मातृभाषा लिपिः देवनागरी ते लिपिं तु तत्र शिक्षिष्यन्त एव। तथापि प्रस्तुतपुस्तकेषु नवीना भारतीलिपिः प्रयुक्ता। अस्या लेखने मात्रादीनां योजने बालकान मुह्यन्ति। ग+इ=गि, ग+उ=गु इति सरलतया ते लेखितुं शक्नुवन्ति

इतः परं प्रस्तुतपुस्तकानामवलम्बनेन एव पाठः पूर्णो भविष्यति। अत्रापि चेयम्- क- एकस्य पाठस्य वारंवारमभ्यासः कार्यः।

ख- द्वौ निकटे च वस्तूनि स्थापयित्वा इदम्, अदः, अयम् इत्यादीनाम्

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अन्यासः कार्यः

ग- कदाऽपि सारल्यदृष्ट्या संस्कृतेतर-भाषया किमपि न बोध्यनीयम्। कदाचित् अध्यापको विचारयति यत् छात्रो न साधु अवगच्छति किन्तु वस्तुतो यदि तावता सह समुचिता हस्तपाद-काकूनां योजना क्रियते तदा स सर्वमवगच्छति। छात्राणां ग्रहणशक्तिः अद्भुता भवति, केवलं तेषां 'रुचिग्रहणं' जननीयम्।

घ- इदं वर्षं सर्वाधिकं महत्त्वपूर्णम्। प्रयोग-द्वारा एव 'च' 'अपि' इति सम्बन्धः पाठनीयः। रामो गच्छति, श्यामोऽपि गच्छति इति द्वाभ्यां बालकाभ्यां प्रदर्शनीयम्। राम-श्यामौ गच्छतः। इत्थमेव सन्धारे पुस्तकं पंजरे शुकः इत्यादि साक्षाद् दर्शनीयम्। सन्धि विषये बहु ध्यानं न देयम्। रामः गच्छति, रामो गच्छति इत्युभयं प्रयोज्यम्। कलमेन लिखति, रामाय ददाति, वृक्षात् पतति इति सर्वं साक्षाद् दर्शयित्वा बालकैरेव वाक्योच्चारणं कारणीयम्

ङ- अस्मिन् वर्षे प्रायः अष्टवर्षीयाः बालकाः भविष्यन्ति। प्रस्तुतयोजनायां गतवर्षस्य पाठ्यक्रमस्य पुनरावृत्तिरेव मुख्यं पाठ्यम्, केवलं संयुक्ताक्षराणां समावेशो नूतनं वस्तु। हलन्ताक्षराणां शिक्षणं महत्त्वपूर्णम्। अत्र ध्येयम्- योऽणीयभाषाणां समस्या भिन्ना। तत्र लिपिः बहु सरला, सा शिक्षणीयैव नास्ति, तत्र तु अक्षरयोगानाम् उच्चारणं समस्या बहु कठिना समस्या, आजीवनं नश्यति। संस्कृ-तायां सा समस्यैव नास्ति। तत्र केवलं लिपि-समस्या। ध्वनीनां सापेक्षा स्थितिः उपर्यधो

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लिपिचिह्नानां प्रयोगः, ट कारादौ अकारस्यादर्शनम् रेफस्य बहुप्रकारत्वं इ-ि- इत्येकस्यैव ध्वनेः कृते चिह्नद्वयत्वम् ि- कारस्य परत्वेऽपि पूर्वलेखनम् इत्यादयः दोषाः। प्रस्तुत लिप्यां एषु अधिकांशदोषाणां मार्जनं कृतम्। क्र-कार, त्या-त्या, घ्र-घर इत्यादि लेखन भेदः साधु शिक्षणीयः। अत्र ध्येयम्-

क- व्याकरणं न पाठनीयम्- केवलं प्रयोगेणैव पठति-कूर्दते, पठतः कूर्दते इति रूपभेदः स्थापनीयः। शुन इत्यमेव लिखति, लिखित्वा गच्छति; आरोहति आरोहत्यचलत्।

ख- एकः द्वौ त्रयः, एका द्वे तिस्रः, एकं द्वे त्रीणि इमानि रूपाणि वारं वारम् अभ्यासेन साध्यनीयानि। पत्युर्मम्य पादः, खट्वायाः पादः इत्यादीनि रूपभेदा अपि वारं वारं प्रयोगेण अत्र बुद्धौ स्थापनीयानि।

ग- इदं विचारणीयं यत् कोमलवयसि तर्कापेक्षया अधिगमोऽधिकं स्वाभाविकः। भाषायाः कृते तु आवश्यकः। फ्रेंचादिभाषासु विशेषणस्य पातेः च रूपाणि संस्कृतापेक्षया जटिलतराणि तथापि प्रयोगेण तत्र बालिका अपि शुद्धं वदन्ति, व्याकरणमपठित्वाऽपि।

घ- अधुना अस्मद्वर्षीणां बालकानां कृते पदसम्बन्धेन वाक्यनिर्माणस्थानि वाक्यानां समूहनं पाठनीयम्। ततः कथानां विशेषं महत्त्वम्।

ङ- अधुना नववर्षबालकानां कृते वाक्य निर्माणं शिक्षणीयम्। तत्रापि प्रारम्भे पुनरावृत्तिरूपेण अयम् इयम् इदम् अस्ति, अदः सहितानि शब्द युगलरूपाणि ततश्च विशेषण-विशेष्यमयानि युगलशब्दवाक्यानि शिक्षणीयानि। ततः विशेष्यविशेषणानि यथा लघु-विशालं ततश्च रंगाः शिक्षणीयाः। क्रिया युक्तानि वाक्यान्यितस्ततश्च लिखन् लिखन्ती - इत्यादिकं सर्वं कथायां साक्षाद् अभिनय माध्यमेन प्रदर्शनीयम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

अस्यां कक्षायां प्रश्नोत्तरे वाक्यरचना विशेषेण विधेया। यथा- किमिदं पुस्तकम्- अयम् इदं पुस्तकम्, यद्वा नहि इदं पुस्तकं नास्ति इदं तु पुष्पम् इति प्रत्येकस्य छात्रस्य अभ्यासः कार्यः।

अत्र अवधेयम्-

क- छात्रः पूर्णवाक्येन उत्तरं ददातु न केवलम् एकेन शब्देन।

ख- क्रमेण सर्वे छात्राः प्रश्नं कुर्युः अपेक्ष्य उत्तरं दद्युः।

ग- वर्षादीनां पाठः तस्मिन् दिने पाठ्यताम् यस्मिन् दिने वर्षा भवतु, तेन अध्यापनं सजीवं भविष्यति।

घ- अस्याः कक्षायाः छात्राः बहिर्भ्रमणाय अवश्यं नेयाः। पाठोक्तवस्तुनः साक्षाद्दर्शनं कारणीयम्।

ङ- किंचित् लिखितोऽभ्यासः कार्यः।

च- नेजक चर्मादीनां चित्रानुसारं वेश-भूषादिना अभिनयः स्पृहणीयः।

छ- अधुना वाक्यसमूह-पाठः प्रारब्धव्यः। गतवर्षे लघुवर्णनानि प्रारब्धानि। तस्यैव विस्तारेण कथात्मकानां वाक्यसमूहाः पाठनीयाः। भाषाज्ञानेन सह विषयबोधविस्तारस्य दृष्ट्या सरल-विषया संस्कृतायां माध्यमेन पाठनीयाः।

अत्र विशेषः-

क- कथां श्रावयित्वा स्वभाषया लेखितुं छात्राः प्रेरणीयाः।

ख- चित्रं दर्शयित्वा तदधिकृत्य वाक्यानि लेखितुं ते प्रेरणीयाः।

ग- पुस्तकस्थाः कविताः साभिनयं छात्राः श्रावयन्तु। सर्वत्र कविता एतादृश्यः सन्ति यत्र लिंग परिवर्तनं शक्यम्- यथा हि अहं बालिका प्रिया भवामि इति गीतिः अहं बालकः प्रियो भवामि

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इति रूपे सहजतया परिवर्तते।

ङ - अधुना एकादशवर्षः छात्रः विराजीयः। नवीनपरिपाट्यां दशवर्षीयं बालकः प्राथमिकशिक्षणस्यान्तिमे भवति। किन्तु प्रस्तुतक्रमे प्राचीनारीतिः स्थिता, यत्र पंचवर्षीयं बालं षड्वर्षैः प्राथमिकीं शिक्षामधुरयत्। नवीनपरिपाटी-शिक्षालयेषु इदं पुस्तकं त्यक्तुं शक्यते।

अस्यां कक्षायां पाठ्यसामग्री तादृशी दत्ता येन छात्रो माध्यमिककक्षाणां कृते आधारभूतं ज्ञानं संस्कृत-माध्यमेन लभेत। रामायणस्य [illegible]: सारांशः, क्वचित् अतिप्रसिद्धा विश्वकथाः, देशपरिचयः, सामान्य-विज्ञानपरिचयः, इत्यादीन रूपेण योजिता येन आंग्ला-दि भाषामपठित्वाऽपि संस्कृतमाध्यमेनैव छात्रस्य ज्ञानस्थितिजोऽल्पव्यासो न तिष्ठेत्। व्यवहारेन्याया-न्यायविवेकं जागरयितुं बहुसावधानतया कथाऽत्र संचिता। कुत्रापि उपदेशप्रणाली न श्रिता। उपदेश-मयी कथाऽपि मनोरंजकरूपेणैव दत्ताः। विज्ञानादि सम्बद्धेषु लेखेषु पर्याप्तानि चित्राणि दत्तानि।

अत्र ध्येयम् -

क - प्राथमिकशिक्षणस्य अन्तिमवर्षत्वात् छात्रा ज्ञानाय बहिरवश्यं नेयाः।

ख - कथा नाटकरूपेण कक्षायामभिनेयाः।

ग - राष्ट्रीय पर्वसु संस्कृतायां ध्वजगानं छात्रा अवश्यं कुर्युः। प्रायः सर्वेषु पुस्तकेषु अन्ते एकैकं ध्वजगानमत्र योजितम्।

घ - यतो हि संस्कृतातिरिक्ता काऽपि भाषा न प्रयोज्या ततोऽर्थ कथमस्य अवसरो भवेत्। प्रश्नोत्तरमाध्यमेन छात्राणां पाठे प्रवेशः कार्यः।

ङ - पाठान्ते दत्ताः प्रश्नाः केवलं निदर्शनम्। बहुशः प्रश्ना निर्मेयाः। छात्रा यथा स्वान् विचारान् स्वयं संस्कृतायां प्रकटयन्तु तथा अभ्यासः कार्यः।

च - सर्वे छात्रा एकाग्रेणां कथां लिखन्तु - एतादृशी प्रतियोगिता कार्या।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

८-८-१०- द्वादशवर्षीयं बालकं वयोत्रयं माध्यमिककक्षासु पठिष्यति। इमाः आधुनिकपरिपाट्यां ६-७-८- कक्षाः कथ्यन्ते। तिसृणामपि कक्षानां कृते एकमेव पुस्तकं निर्मीयते। तत्र एकवर्षं चतुर्वर्षाणात् पुरा संकलिता सामग्री ३२ पाठेषु विभक्ता। कक्षाणां पुस्तकानि पृथक् न निर्मितानि यतोहि अष्टमकक्षान्तं एव सार्वजनिकी भवति परीक्षा। ६ष्ठ-७म-कक्षयोः स्थानीया परीक्षा भवति। तत्र प्रायः पाठ्यक्रम उपेक्ष्यते। प्रस्तुत पुस्तकेषु सामग्री-चयनं बहु सावधानतया कृतम्। तत्र कोऽपि पाठ्य उपेक्ष्यो नास्ति। शिक्षकाः स्वयमेव स्थानीयावश्यकतानुसारं पाठानां शिक्षणं निर्धारयितुं समर्थाः।

पाठ्य सामग्री प्रायः एतादृशी यां छात्राः अन्येषु विषयेषु अपि पठिष्यन्ति। द्विःपठनेन तेषां विषयग्रहणं दृढं भविष्यति। महाभारतस्य सारांशेन रामायणसारांशेन मिलित्वा भारतीय प्रसिद्धा सांस्कृतिकी परम्परा पूर्णतामेष्यति। तत्र पाठाः विज्ञानं रुचिं जनयन्तोऽपि प्राचीन संस्कृत-साहित्येन सह परिचयं ददति। कालिदासस्य जगत्प्रसिद्धम् अभिज्ञानशाकुन्तलं रघुवंशं च स्वल्पांशरूपेण साक्षात् परिचायितम्।

राष्ट्रीयताबोधेन सह आधुनिकी आलोचनात्मिका वृत्तिः छात्रेषु स्यात् इति व्यंग्यशैलीप्रधाना रचनाः पर्याप्तरूपेण अत्र समावेशिताः। धैर्य-सन्तोष-पराक्रम-साहस-ग्रामप्रेम-जनसेवा-जीवदया-प्रभृतीनां भावानां स्थापनाय साहित्यविषयान् तु उपदेशविषया पाठाः प्रविष्यन्ति। अत्रापि इदं ध्येयम्-

क- सर्वाः कविताः कक्षायां छात्रैः गेयाः। कविता-पाठने अर्थावबोधाय बहु क्लेशो न कार्यः। काव्यं लालित्यबोधाय पाठ्यते। सस्वरं गानेनैव तस्य लब्धिः नतु अर्थावबोधेन।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ख- व्याकरणं बहुन पाठनीयम्। रिक्तस्थानपूरणं, मौखिकसेषण कथाश्रावणं, परस्परं वाक्येषु अशुद्धि संबोधनं, प्रश्नोत्तरं, स्वानुभवलेखनम् इत्यादिभाव्यमिन चूर्णानि वाक्यानि स्व हृदयं गतानि कार्यानि।

ग- सत्य-परोपकारादि सारादुपदेशभयानिबंधा न लेखनीयाः। उपदेशं कोऽपि बालको न गृह्णाति। बालक अनुकरणशीलः। स कथानके विवक्षितान् पुरुषान् अनुकरिष्यति। पुनश्चापुना विक्षकेषु केचिद् चनैकदृष्टयो निबन्धादिसहायक-पुस्तकानि लिखन्ति। बालकाः प्रायो निबन्धं रटन्ति। तेन तेषां पठनावबोधनरुचिः समाप्येत।

घ- लेखनापेक्षया भाषणस्योपरि अधिकं बलं देयम्।

१०-११-१२: इमानि पुस्तकानि उच्चकक्षायाः ६-१०कृते। तत्र प्रथमा पाठावली, द्वितीया काव्यगुच्छिका तृतीयः नाट्यकथासारः, चतुर्थी अभ्यासावली। मुख्यः पाठग्रन्थः पाठावली। उच्चकक्षासु पाठनविधिः बहु महत्त्वं याँचति। किन्तु अद्यना यावत् अनुवादपद्धतेः प्रचलितत्वाद् अध्यापकैः सावधानैः भाव्यम्।

क- कदापि मातृभाषया अनूद्य अर्थो न बोधनीयः। सरलसंस्कृतभाषयैवार्थो बोधनीयः। यदि कस्यचिद् ईदृशस्य वस्तुनो नाम भवेद् यस्य लक्षणं कठिनं तद्वर्णनानन्तरं तस्य मातृभाषानामोच्चारणे न हानिः।

ख- कक्षायाम् संस्कृतेव भाषा वदनीया। यत्र क्वचित् मातृभाषा तद्रूपाः शब्दाः भवन्तु तत्र ते स्व प्रयोक्तव्याः। अनेन यदि सम्पूर्णे देशे एकरूपतायां काचित् क्षतिरपि भवेत्, न हानिः।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

यथा हि हिन्दीक्षेत्रे पानीयं, बंगादिषु जलं दक्षिणे नीरं प्रयोज्यम्।

ग- कविता पाठने पूर्वमेव एकैकमक्षरं न पाठ्यम्। कवितायाः भावं स्वेषु शब्देषु एवं वक्तव्यम्। ततः छात्रा उच्चैः कवितां पठन्तु। तदा पुनः शिक्षकेण कवितायाः समालोचन-पूर्वकं मूल्यांकनं करणीयम्। अयं महाकविः संस्कृतकाव्यस्य सूर्यः इत्यादि प्रशंसा न कदापि कार्या। कविकथितं तुभ्यं रोचते नवा? यदि रोचते तर्हि तस्य किं कारणं किं स्वरूपम् इत्यादि प्रश्नैः काव्यसौन्दर्यानुभूतिः जागरणीया।

घ- नाट्यकथासारे संस्कृतायाः दशायाः प्रतिपादकानां नाट्यानां कथासारः। सः द्रुतपाठ्यः। छात्रा इमं गृहे पठन्तु। कक्षायां पूर्वप्रोक्षित-पाठस्योपरि प्रश्नोत्तरमेव कार्यम्। इदंवारं वारं छात्रेभ्यो बोधनीयं यत् साहित्यम् इतिहासो न। दुष्यन्तः कीदृशः आसीद्, आसीद् वा नैवासीद् इति तु इतिहासस्य विषयः। कालिदासेन चित्रितो दुष्यन्त एव साहित्य-छात्राणां विषयः। दिलीप-रामयोः मध्ये कतीनांकानी पीढीनाम् अन्तरमिति न मम विषयः। दिलीप-रघु-अज-दशरथ-रामेति क्रमेण कालिदासेन ते वर्णिता इति ज्ञानमेवास्माकं लक्ष्यम्। इयं दृष्टिः आवश्यकी, नो चेत् साहित्यस्य रसो नश्यति।

साहित्यकारः स्वकथानकस्य यत्रतत्रासंलग्नेन रूपेण कथानकं रचयति येन पाठकोऽजानन् एव कविः सन्देशं गृह्णातु। सन्देशहीनं साहित्यं मूल्यहीनम्। शब्दार्थग्रहणापेक्षया सन्देशग्रहणमावश्यकतरम्। शब्दार्थग्रहणं तु उपायत्वाद् आदरणीयम्।

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

ङ- अन्तिमं पुस्तकम्- अभ्यासावली- इदं केवलं निदर्शनं न तु इयत्ता। सर्वप्रकाराणि रूपाणि संकेत-रूपेण पाठनीयानि न तु साम्रग्र्येण। संस्कृतपरिपाट्यां दोषो यत् ते 'सम्पूर्णं' 'विस्तृतं' न पठन्ति। ~~यदि~~ सर्वेषां लकाराणां परिचयो देयः। प्रयोगे किन्तु-क-क्तवतु- तव्य- अनीय- तुम्-त्वा-प्रकृतीनां बाहुल्यं कार्यम्। आंग्लभाषाया एकमात्रिकगति-सर्वोत्तमाग्रहेण उत्तमं विनाशयति। संस्कृत-पंडितः "अहमिदं न जानामि" इति कथने मृत्यु-कष्टमनुभवति, ततः सकुण्ठा उत्तरे मायाम् आश्रयते। इयं प्रवृत्तिः सर्वत्र त्याज्या। पुस्तके दृष्ट्वा वदिष्यामि इति कथने एव गौरवं न तु असातमयुद्धरूपेण कथने। न जानामि इति कथनं चारित्रं वर्धयति सम्मानं चार्जयति। प्रसिद्धा अपि पाश्चात्य चिकित्सका अल्पेऽपि मोहे उत्पन्ने विशेषज्ञस्य पार्श्वे प्रेषयन्ति। वैद्याः पुनः धन्वन्तरायमाणाः रोगिणं हन्ति किन्तु स्व-मोहं न प्रकटयन्ति। इयं प्रवृत्तिः त्याज्या। सहयोगिभावेनैव छात्राः पाठनीया न तु स्वामि-भृत्यवत् सर्वत्र-रूढवत् सम्बन्धो विधेयः।

यदि छात्रो विद्वान् भविष्यति तदैवत्वं सफलो गुरुः। इदं स्मरणीयम्- सर्वतोजयम् इच्छेत् शिष्यात् पुत्रात् पराजयम्। यदि इयं भावना आगमिष्यति, सर्वेऽपि शिक्षण विधिं स्वयं सेत्स्यति

मूलमन्त्राः

१- लिंगदोषो दोषो न भवति। सर्वे वैय्याकरणाः कथयन्ति- लिंगमतन्त्रम्।

२- यावत् विशेष्य कथनस्यावश्यकता न भवेत् तावत् सर्वत्र एकवचनम् उत्सर्गत्वाद् युक्तम्।

३- विशेषणं यदि नपुंसके स्यात् तदा सर्वत्र

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

४- क्रियामणिं अन्वेति सर्वथा शुद्धं चलाक्षरम्।
वेद-पुराण-महाकाव्यादिषु प्रयुक्ताः शब्दाः
कुत्रापि प्रमादाः न। साहित्य-व्याकरणविरोधे
साहित्यमेव मानकम्।

५- सर्वा शब्दव्युत्पत्तिः काल्पनिकी असत्या च। सिद्धः
शब्द एव सत्यः। अर्थवत्-सूत्रेण धातुभिन्नानां
सर्वेषां प्रातिपदिकत्वात् ईसामसीहः, रांडारम्,
इति सर्वंशुद्धम् तत्र विचिकित्सा न कार्या।

६- क्विप्-प्रत्ययेन सर्वाणि प्रातिपदिकानि धातुसंज्ञां
लभन्ते। ततः (गान्धीयति, भारत इंग्लैण्डायते)
प्रधानति, पुस्तकति हरति इत्यादिः शुद्ध एव।
संक्षेपेण संस्कृताबहुलबहुमक्षणीया
नान्या भाषा इति पाठनविधिः।

निवेदनम्- अल्पत्वात् समयस्य यदि
कुत्रापि लेख्याशुद्धिः स्यात्, सा सूचनीया।
मुद्रणसमये संशोध्यिष्यते।

Kashi Maharani Collection, Ramnagar Fort, Varanasi